



स्वामी दयानन्द आश्रम,
ऋषिकेश - 249137

*Scan for E- BOOKS*

केनोपनिषद्

पदानुक्रम-व्युत्पत्ति-ज्ञानकोशः

# केनोपनिषद्



## पदानुक्रम-व्युत्पत्ति-ज्ञानकोशः

# केनोपनिषद्

## पदानुक्रम-व्युत्पत्ति-ज्ञानकोशः

हार्दिक धन्यवाद
**पूज्य स्वामी साक्षात्कृतानन्द सरस्वती**
**आचार्य राजेश्वर मिश्र**
**ब्रह्मचारी श्रीनिवासन**

जिनके सहयोग से यह कार्य सिद्ध हुआ

**श्रीमती वर्षा कजारिया**

© 2025 by the Author

All rights reserved. No part (either whole or part) may be reproduced, copied, scanned, stored in a retrieval system, recoeded or transmitted in form or by any means including but not limited to electronic and mechanical means, without the prior written permission of the author.

Website : www.paninisutra.com

Published by
Sri Gangadhareshwar Trust
Swami Dayananda Ashram
Risikesh, Uttarakhand - 249137

प्रथम संस्करण 2025
मूल्य - 250/-

पुस्तक उपलब्धि स्थान -

स्वामी दयानन्द आश्रम
मुनि की रेती,
ऋषिकेश 249137
+ 91 98430 43607

राजेश्वराचार्य जी
A-19, इन्दिरा एन्क्लेव
नेब सराय,
नई दिल्ली - 110068
+ 91 8178775405
sanskritam2005@gmail.com

ॐ

तत्सद्ब्रह्मणे नमः

# केनोपनिषद्

## शान्तिपाठः

ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि । सर्वं ब्रह्मौपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥
ॐ शान्तिः शान्तिः शान्तिः ।

# ॥ प्रेरणापत्र ॥

**जीवन में दो ही आनंद हैं - ''एक है वेदांत, दूसरा है संस्कृत ।''**

ऐसा मेरे गुरुजी **स्वामी प्रबुद्धानन्द जी** ने कहा था। उनसे मैंने 1992 से वेदान्त का आनन्द पूर्वक निरन्तर अध्ययन किया। क्योंकि हमारे सभी शास्त्र संस्कृत में हैं, स्वामी जी हमें संस्कृत भी सिखाते थे, परन्तु मुझे संस्कृत का बिल्कुल भी ज्ञान नहीं था। तब मैंने सोचा कि जीवन में दूसरा आनन्द भी प्राप्त करना चाहिए। पढ़ाई की कोई उम्र नहीं होती। मैंने 55 वर्ष की आयु में स्वयं के सुख के लिए संस्कृत पढ़ने की ठान ली। समाचार पत्रों में विज्ञापन दिया **लघुसिद्धान्तकौमुदी** के ज्ञाता की आवश्यकता है।

प्रभु की असीम कृपा से **आचार्य राजेश्वर मिश्र जी** मिले जो संस्कृत के पूर्ण ज्ञाता हैं। उनसे मैंने 2007 से आनन्द पूर्वक सरलता से पाणिनि के प्रत्येक सूत्रों को समझा। भगवान् श्रीकृष्ण ने साक्षात्स्वरूप से मुझे प्रेरणा दी कि मैं भगवद्गीता व उपनिषदों की धात्वर्थ-व्युत्पत्ति करूँ। तब उन सूत्रों का आधार लेकर संस्कृत प्रेमियों की सुविधा के लिए भगवद्गीता व उपनिषदों का प्रकाशन हुआ।

मेरी इष्टदेवी पहाड़ी माता की असीम अनुकम्पा से यह कार्य सिद्ध हुआ, जो आपके सामने उपस्थित है।

आशा है कि आप सब पूर्ण लाभान्वित होंगे।

धन्यवाद।
**श्रीमती वर्षा कजारिया**
वसंत पंचमी 2080

**अग्निः** (मन्त्रः 3.4, 4.2) अग्नि + सुँ = अग्निः अग्-धातोः (अगि गतौ, भ्वादिः, सि कौ धा सं -146), **इदित्त्वात् इदितो नुम् धातोः** (पा.सू. 7-1-58) इति नुम्, अन् ग् **अङ्गेर्नलोपश्च** (उणा.सू. 4-50) इति निप्रत्ययः नलोपश्च, ततः अग्नि इति । पुं.प्र.वि.ए.व. ।

**अग्निम्** (मन्त्रः 3.3) अग्नि + अम्, **अमि पूर्वः** (पा.सू. 6-1-107) इति पूर्वरूपम् । अग्-धातोः (अगि गतौ, भ्वादिः, सि. कौ. धा. सं -146), **इदित्त्वात् इदितो नुम् धातोः** (पा.सू. 7-1-58) इति नुम्, अन् ग् **अङ्गेर्नलोपश्च** (उणा.सू. 4-50) इति निप्रत्ययः नलोपश्च, ततः अग्नि इति । पुं.द्वि.वि.ए.व. ।

**अतितराम्** (मन्त्रः4.2, 4.3) अतिशयेन अति, **द्विवचनविभज्योपपदे तरबीयसुनौ** (पा.सू. 5-3-57) इति तरप्, अति + तरप्, **तरप्तमौ घः** (पा.सू. 1-1-22) इति तरप्-प्रत्ययः घसञ्ज्ञकः, **किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे** (पा.सू.5-4-11) इति आमु-प्रत्ययः, अतितर + आम्, **यस्येति च** (पा.सू. 6-4-148) इति भस्य अकारलोपः, **तद्धितश्चासर्वविभक्तिः** (पा.सू. 1-1-38) इति अव्ययसञ्ज्ञा, ततः अतितराम् इति।

**अतिमुच्य** (मन्त्रः1.2) अव्ययम् अति-पूर्वकात् मुच्-धातोः (मुच्लृँ मोक्षणे, तुदादिः, सि.कौ.धा.सं -1430) **समानकर्तृकयोः पूर्वकाले** (पा.सू. 3-4-21) इति क्त्वा-प्रत्ययः, **समासेऽनञ्पूर्वे क्त्वो ल्यप्** (पा.सू. 7-1-37) इति ल्यप्, **क्त्वातोसुन्कसुनः** (पा.सू. 1-1-40) इति अव्ययम्, ततः अतिमुच्य इति।

अतिमुच्य = श्रोत्राद्यात्मभावं परित्यज्य इति शङ्करपदभाष्ये ।

**अथ** (मन्त्रः 2.1, 2.5, 3.7, 3.11, 4.5) अव्ययम् **अर्थ-धातोः** (अर्थ उपयाच्ञायाम्, चुरादिः, सि कौ धा सं-1905), वार्तिकम् - **अन्येभ्योऽपि दृश्यते** (मा.भा.वा.सं.-2072) **अन्येष्वपि दृश्यते** (पा.सू. 3-2-101 इत्यत्र) इति ड-प्रत्ययः, **पृषोदरादीनि यथोपदिष्टम्** (पा.सू. 6-3-109) इति रेफस्य लोपश्च, चादिगणशब्दोऽयम् **चादयोऽसत्त्वे** (पा.सू.1-4-57) इति निपातसञ्ज्ञकः, अतः **स्वरादिनिपातमव्ययम्** (पा.सू. 1-1-37) इति अव्ययम्।

**अथो** (मन्त्रः 1.4 ) अव्ययम् अर्थ-धातोः (अर्थ उपयाच्ञायाम् चुरादिः, सि.कौ.धा.सं.-1905) **उणादयो बहुलम्** (पा.सू.3-3-1) इति बाहुलकात् डो-प्रत्ययः, पृषोदरादित्वात् **पृषोदरादीनि यथोपदिष्टम्** (पा.सू. 6-3-109) इति रेफस्य लोपः. चादिगणशब्दोऽयम् **चादयोऽसत्त्वे** (पा.सू.1-4-57) इति निपातसञ्ज्ञकः, अतः **स्वरादिनिपातमव्ययम्** (पा.सू. 1-1-37) इति अव्ययम् ।

अथो = अपि इति शङ्करपदभाष्ये ।

**अध्यात्मम्** (मन्त्रः 4.5) अव्ययम् आत्मनि इति अध्यात्मम् (अव्ययीभावसमासः) आत्मन् + ङि + अधि इत्यत्र **अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भाव-पश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु** (पा.सू. 2-1-6) इति सूत्रेण अव्ययीभाव-समासः, अस्वपदविग्रहः आत्मन् + ङि + अधि, **प्रथमानिर्दिष्टं समास उपसर्जनम्** (पा



सू 1-2-43) तथा **उपसर्जनम् पूर्वम्** (पा सू 2-2-60) इति आभ्याम् सूत्राभ्याम् अव्ययस्य अधेः प्राक् प्रयोगः, अधि + आत्मन् + ङि), **कृत्तद्धितसमासाश्च** (पा सू 1-2-46) इति अस्य प्रातिपदिकसञ्ज्ञा, **सुपो धातुप्रातिपदिकयोः** (पा सू 2-4-71) इति ङेः लुक्, **इको यणचि** (पा सू 6-1-77) इति यण्, अध्यात्मन्, **अनश्च** (पा.सू. 5-4-108) इति समासान्तः टच्. अध्यात्मन् + टच्, **नस्तद्धिते** (पा.सू. 6-4-144) इति भस्य टेः, अनः लोपः, अध्यात्म, एकदेशविकृतस्य अनन्यत्वाद् इति न्यायेन अस्य प्रातिपदिकसञ्ज्ञा निर्बाधः, **अव्ययीभावश्च** (पा सू 1-1-41) इति अव्ययसञ्ज्ञा अपि, तस्मात् स्वादयः अध्यात्म + सुँ, **नाव्ययीभावादतोऽम्त्वपञ्चम्याः** (पा सू 2-4-83 ) इति अव्ययसञ्ज्ञकात् विहितसुपः अम्, **अमि पूर्वः** (पा सू 6-1-107) इति पूर्वरूपम्, ततः अध्यात्मम् इति सिद्ध्यति। आत्मन् इत्यत्र अत्-धातोः (अत सातत्यगमने, भ्वादिः, सि.कौ.धा.सं. 38) **सातिभ्यां मनिन्मनिणौ इति** (उणा.सू. 4-152) मनिण्-प्रत्ययः, **अत उपधायाः** (पा.सू. 7-1-116) इति वृद्धिः ।

अध्यात्मम् आत्मनः अधि आत्मविषयम् इति शङ्करपदभाष्ये ।

**अधि ( मन्त्रः1.4 )** अव्ययम् शब्दोऽयम् प्रादिगणपठितत्वात् **प्रादयः** (पा.सू.1-4-58)इति निपातसञ्ज्ञकः, अतः **स्वरादिनिपातमव्ययम्** (पा.सू. 1-1-37) इति अव्ययम् ।

अधिशब्दश्चान्यार्थे इति शङ्करपदभाष्ये ।

**अधिदैवतम्** (मन्त्रः 4.4) अव्ययम् दैवते इति अधिदैवतम् (अव्ययीभावसमासः) दैवत + ङि अधि इत्यत्र **अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भाव-पश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु** (पा.सू. 2-1-6) इति सूत्रेण अव्ययीभाव-समासः, अस्वपदविग्रहः दैवत + ङि + अधि, **प्रथमानिर्दिष्टं समास उपसर्जनम्** (पा सू 1-2-43) तथा **उपसर्जनम् पूर्वम्** (पा सू 2-2-60) इति आभ्याम् सूत्राभ्याम् अव्ययस्य अधेः प्राक् प्रयोगः, अधि + दैवत + ङि, **कृत्तद्धितसमासाश्च** (पा सू 1-2-46) इति अस्य प्रातिपदिकसञ्ज्ञा, **सुपो धातुप्रातिपदिकयोः** (पा सू 2-4-71) इति ङेः लुक्, अधिदैवत, एकदेशविकृतस्य अनन्यत्वाद् इति न्यायेन अस्य प्रातिपदिकसञ्ज्ञा निर्बाधः, **अव्ययीभावश्च** (पा सू 1-1-41) इति अव्ययसञ्ज्ञा अपि, तस्मात् स्वादयः, अधिदैवत + सुँ, **नाव्ययीभावादतोऽम्त्वपञ्चम्याः** ( पा सू 2-4-83 ) इति अव्ययसञ्ज्ञकात् विहितसुपः अम्, **अमि पूर्वः** (पा सू 6-1-107) इति पूर्वरूपम्, ततः अधिदैवतम् इति सिद्ध्यति। देवता एव दैवतम्, **स्वार्थे प्रज्ञादिभ्यश्च** (पा.सू.5-4-38) इति अण्, **तद्धितेष्वचामादेः** (पा.सू. 7-2-117) इति आदिवृद्धिः, **यस्येति च** (पा.सू. 6-4-148) इति आकारलोपः। देवता इत्यत्र देवशब्दात् **देवात्तल्** (पा.सू. 5-4-27) इति सूत्रेण तल्, **अजाद्यतष्टाप्** (पा.सू. 4-1-4) इति टाप् । देव इत्यत्र दिव्-धातोः (दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु, दिवादिः, सि.कौ. - धा.सं. 1107) **नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः** (पा.सू. 3-1-134) इति अच्, **पुगन्तलघूपधस्य च** (पा.सू. 7-3-86) इति गुणः।

अधिदैवतम् = देवताया अधि यद्दर्शनम् इति शङ्करपदभाष्ये।



**अनन्ते** (मन्त्रः4.9) अनन्त + ङि **आद्गुणः** (पा.सू. 6-1-87) इति गुणः। अनन्त इत्यत्र अविद्यमानः अन्तः यस्य सः । न विद्यमानः अविद्यमानः इत्यत्र न विद्यमान + सुँ, **नञ्** (पा.सू. 2-2-6) इति समासः, **कृत्तद्धितसमासाश्च** (पा.सू. 1-2-46) इति अस्य प्रातिपदिकम्, **सुपो धातुप्रातिपदिकयोः** (पा.सू. 2-4-71) इति सुँप्रत्ययस्य लोपः, **नलोपो नञः** (पा.सू. 6-3-73) इति नकारस्य लोपः, ततः अविद्यमान इति अविद्यमान + सुँ, अन्त + सुँ इति अलौकिकविग्रहः, **अनेकमन्यपदार्थे** (पा.सू.2-2-24) इति बहुव्रीहिसमासः, **कृत्तद्धितसमासाश्च** (पा.सू. 1-2-46) इति अस्य प्रातिपदिकम्, **सुपो धातुप्रातिपदिकयोः** (पा.सू. 2-4-71) इति सुँप्रत्ययद्वयस्य लोपः, अविद्यमान + अन्त, वार्तिकम् - **नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः** (सि.कौ.वा.सं.1369, सि.कौ.सू.सं.830) **अनेकमन्यपदार्थे** (पा सू 2-2-24) इत्यत्र इति विद्यमान इत्यस्य लोपः, अ + अन्त, **तस्मान्नुडचि** (पा.सू.6-3-74) इति नुट्, अ + न* अन्त, ततः अनन्त इति । अन्त इत्यत्र अत्-धातोः (अति बन्धने, भ्वादिः, सि.कौ.धा.सं. 61) **इदितो नुम् धातोः** (पा.सू. 7-1-58) इति नुम्-आगमः, **धातोः भावे** (पा.सू. 3-3-18) इति घञ् । पुं.स.वि.ए.व.।

अनन्ते अपारे इति शङ्करपदभाष्ये ।

**अनभ्युदितम्** (मन्त्रः1.5) अनभ्युदित + सुँ, **अतोऽम्** (पा.सू. 7-1-24) इति सुँ-प्रत्ययस्य स्थाने अम्-आदेशः, **अमि पूर्वः** (पा.सू. 6-1-107) इति पूर्वरूपम्। अनभ्युदितम् इत्यत्र न अभ्युदितम् अनभ्युदितम् इति नञ् समासः । **नञ्** (पा.सू. 2-2-6) इति समासः, **नलोपो नञः** (पा.सू. 6-3-73) इति नस्य लोपः । **तस्मान्नुडचि** (पा.सू.6-3-74) इति नुट् । अभ्युदितम् इत्यत्र अभि-पूर्वकात् वद् धातोः (वदँ व्यक्तायां वाचि, भ्वादिः, सि.कौ.धा.सं.1009) **निष्ठा** (पा.सू. 3-2-102) इत्यनेन क्त प्रत्ययः, **आर्धधातुकस्येड् वलादेः** (पा.सू. 7-2-35) इति क्तप्रत्ययस्य इट्, धातोः वकारस्य **वचिस्वपियजादीनां किति** (पा.सू. 6-1-15) इति सम्प्रसारणम्, अतः (उ + अ द्) + इत इति, उकाराकारयोः स्थाने **सम्प्रसारणाच्च** (पा.सू. 6-1-108) इति एकः पूर्वरूपम् उकारः, ततः उदित इति, अभि + उदित इत्यत्र **इको यणचि** (पा.सू.6-1-87) इति इकारस्य यकारः, ततः अभ्युदितम् इति । नपुं.प्र.वि.ए.व. ।

अनभ्युदितम् अप्रकाशितम् अनभ्युक्तम् इति शङ्करपदभाष्ये ।

**अनुशिष्यात्** (मन्त्रः1.3) अनुपूर्वकाद् शिष्यात्, अनु + शिष्यात् = अनुशिष्यात् । शिष्यात् इत्यत्र शास्-धातोः (शासुँ अनुशिष्टौ, अदादिः सि.कौ.धा.सं.1075) विधिलिङ्, शास् + विधिलिङ्, शास् + तिप्, **कर्तरि शप्** (पा.सू. 3-1-68) इति शप्, **अदिप्रभृतिभ्यः शपः** (पा.सू. 2-4-72) इति शपः लुक्, **इतश्च** (पा.सू. 3-4-100) इति तिपः इकारस्य लोपः, **यासुट् परस्मैपदेषूदात्तो ङिच्च** (पा.सू. 3-4-103) इति तिपः यासुड् आगमः,(शास् + यास् त्), **सुट् तिथोः** (पा.सू. 3-4-107) इति तिपः सुड् आगमः, (शास् + यास् स् त्), **लिङः सलोपोऽनन्त्यस्य** (पा.सू. 7-2-79) इति यासुटः सुटश्च सकारद्वयस्य लोपः, शास् + यात्, **शास इदङ्हलोः** (पा.सू. 6-4-34 ) इति शासः आकारस्य इकारः, **शासिवसिघसीनां च** (पा.सू. 8-3-60) इति शासः सकारस्य मूर्धन्यादेशः, ततः शिष्यात् इति । विधिलिङ्.प्र.पु.ए.व.।

अनुशिष्यात् = उपदिशेच्छिष्यायेत्यभिप्रायः इति शङ्करपदभाष्ये ।

**अनेन** (मन्त्रः4.5) इदम् + टा, **त्यदादीनामः** (पा.सू.7-2-102) इति अत्वम्, **अतो गुणे** (पा.सू.6-1-97) इति पररूपम्, इद + आ, **अनाप्यकः** (पा.सू. 7-2-112) इति इदः स्थाने अन्-आदेशः, **टाङसिङसामिनात्स्याः** (पा.सू. 7-1-12) इति टा-स्थाने इनादेशः, अन् + अ + इन, **आद्गुणः** (पा.सू.6-1-87) इति गुणः । इदम् इत्यत्र इण्-धातोः (इण् गतौ, अदादिः, सि.कौ.धा.सं.1054) बाहुलकात् दमुक्-प्रत्ययः, **सार्वधातुकार्धधातुकयोः** (पा.सू. 7-3-84) इति गुणः प्राप्तः, **क्ङिति च** (पा.सू. 1-1-5) इति तस्य निषेधः, ततः इदम् इति । नपुं.तृ.वि.ए.व. ।

अनेन = मनसा इति शङ्करपदभाष्ये ।

**अन्यत्** (मन्त्रः1.4) अन्य सु, **अद्ड्डतरादिभ्यः पञ्चभ्यः** (पा.सू. 7-1-25) इति सु-स्थाने अद्ड्-आदेशः, अन्य + अद्, **टेः** (पा.सू. 6-4-143) इति भस्य टेः अकारस्य लोपः, अन्यद्, **झलां जशोऽन्ते** (पा.सू. 8-2-39) इति जश्त्वम्, ततः अन्यद्

इति । अन्य इत्यत्र अन्-धातोः (अन प्राणने, अदादिः, सि.कौ.धा.सं. 1070) **अघ्न्यादयश्च** (उणा.सू. 4-111) इति सूत्रेण यक्-प्रत्ययः, अन्यत् इति अव्ययमपि वर्तते । नपुं.प्र.वि.ए.व. ।

अन्यद् = पृथग् इति शङ्करपदभाष्ये।

**अन्यान्** (मन्त्रः 4.2,4.3) अन्य + शस् इत्यत्र **प्रथमयोः पूर्वसवर्णः** (पा.सू. 6-1-102) इति दीर्घः, **तस्माच्छसो नः पुंसि** (पा.सू. 6-1-103) सकारस्य नकारः । अन्-धातोः (अन प्राणने, अदादिः, सि.कौ.धा.सं. 1070) **अघ्न्यादयश्च** (उणा.सू 4-111) इति सूत्रेण यक्- प्रत्ययः । पुं.द्वि.वि.ए.व. ।

**अपहत्य** (मन्त्रः4.9) अप-पूर्वकात् हन्-धातोः (हनँ हिंसागत्योः अदादिः, सि.कौ.धा.सं. 1012) **समानकर्तृकयोः पूर्वकाले** (पा.सू. 3-4-21) इति क्त्वा-प्रत्ययः, अप + हन् + त्वा **अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिक लोपो झलि क्ङिति** (पा.सू.6-4-37) इति हनः नकारस्य लोपः, **क्त्वा-प्रत्ययस्य समासेऽनञ्पूर्वे क्त्वो ल्यप्** (पा.सू. 7-1-37) इति ल्यप्, अप + ह + य, **ह्रस्वस्य पिति कृति तुक्** (पा.सू. 6-1-71) इति तुक्, **क्त्वातोसुन्कसुनः** (पा.सू.1-1-40) इति अव्ययम्, ततः अपहत्य इति। अव्ययम् ।

अपहत्य = अविद्याकामकर्मलक्षणं संसारबीजं विधूय इति शङ्करपदभाष्ये ।

**अपि** (मन्त्रः 2.1, 3.5, 3.9) शब्दोऽयम् प्रादिगणपठितत्वात् **प्रादयः** (पा.सू.1-4-58) इति निपातसञ्ज्ञकः, अतः **स्वरादिनिपातमव्ययम्** (पा.सू. 1-1-37) इति अव्ययम्।



**अब्रवीत्** (मन्त्रः3.4,3.8) ब्रू-धातोः (ब्रूञ् व्यक्तायां वाचि, अदादिः, सि.कौ.धा.सं. 1044) लङ्, ब्रू + तिप्, **कर्तरि शप्** (पा.सू. 3-1-68) इति शप्, **अदिप्रभृतिभ्यः शपः** (पा.सू. 2-4-72) इति शपः लुक्, **इतश्च** (पा.सू. 3-4-100) इति इकारस्य लोपः, **ब्रुव ईट्** (पा.सू. 7-3-93) इति ईट्-आगमः, धातोः **सार्वधातुकार्धधातुकयोः** (पा.सू. 7-3-84) इति गुणः, **एचोऽयवायावः** (पा.सू. 6-1-78) इति अवादेशः, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** (पा.सू. 6-4-71) इति अट्-आगमः अब्रवीत् । लङ्.प्र.पु.ए.व. ।

**अब्रुवन्** (मन्त्रः3.3,3.7,3.11) ब्रू-धातोः (ब्रूञ् व्यक्तायां वाचि, अदादिः, सि.कौ.धा.सं. 1044) लङ्, ब्रू + झि, झिप्रत्ययस्य **इतश्च** (पा.सू. 3-4-100) इति इकारस्य लोपः, **झोऽन्तः** (पा.सू. 7-1-3) इति अन्त्- आदेशः, **कर्तरि शप्** (पा.सू. 3-1-68) इति शप्, **अदिप्रभृतिभ्यः शपः** (पा.सू. 2-4-72) इति शपः लुक्, धातोः उकारस्य स्थाने **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (पा.सू. 6-4-77) इति उवङ्-आदेशः, तथा **लुङ्लङ्लृङ्क्ष्वडुदात्तः** (पा.सू. 6-4-71) इति अट्-आगमः, तिङन्तस्य पदस्य **संयोगान्तस्य लोपः** (पा.सू.8-2-23) इति अन्त्यतकारस्य लोपः, ततः अब्रुवन् इति । लङ्.प्र.पु.ब.व. ।

**अब्रूम** (मन्त्रः4.7) ब्रू-धातोः (ब्रूञ् व्यक्तायां वाचि, अदादिः, सि.कौ.धा.सं. 1044) लङ्, ब्रू + मस्, मस्-प्रत्ययस्य **नित्यं ङितः** (पा.सू. 3-4-99) इति सकारस्य लोपः, धातोः **कर्तरि शप्** (पा.सू. 3-1-68) इति शप्, **अदिप्रभृतिभ्यः शपः** (पा.सू.

2-4-72) इति शपः लुक्, मस्-प्रत्ययस्य **सार्वधातुकमपित्** (पा.सू. 1-2-4) इति ङित्, अतः धातोः **सार्वधातुकार्धधातुकयोः** (पा.सू. 7-3-84) इति प्राप्तः गुणः, **क्ङिति च** (पा.सू. 1-1-5) इति निषेधः, **लुङ्लङ्लृङ्क्ष्वड्उदात्तः** (पा.सू. 6-4-71) इति अट्-आगमः, ततः अब्रूम इति । लङ्.उ.पु.ब.व. ।

**अभिसंवाञ्छन्ति** (मन्त्रः4.6) अभिसम्-पूर्वकात् वाञ्छ्-धातोः (वाछिँ इच्छायाम् भ्वादिः, सि.कौ.धा.सं. 208) लट्, लटः झि, वाञ्छ् + झि, **झोऽन्तः** (पा.सू. 7-1-3) इति झकारस्य अन्त्-आदेशः, **कर्तरि शप्** (पा.सू. 3-1-68) इति शप्, **अतो गुणे** (पा.सू. 6-1-97) इति एकः पररूपम् अकारः, ततः अभिसंवाञ्छन्ति इति, **छन्दसि परेऽपि** (पा.सू.1-4-81) इति अनेन अभि इति व्यवहृतोऽपि वाञ्छति इत्यस्य एव उपसर्गः । लट्.प्र.पु.ब.व. । अभिसंवाञ्छन्ति प्रार्थयन्ते इति शङ्करपदभाष्ये ।

**अभीक्ष्णम्** (मन्त्रः4.5) अभिपूर्वकाद् क्ष्णु-धातोः (क्ष्णु तेजने, अदादिः, सि.कौ.धा.सं.-1037) बाहुलकात् डमु-प्रत्ययः, अभि + क्ष्णु + अम्, डित्त्वसामर्थ्याद् टेर्लोपः, अभि + क्ष्ण + अम्, **पृषोदरादीनि यथोपदिष्टम्** (पा.सू. 6-3-109) इति दीर्घः, ततः अभीक्ष्णम् इति, स्वरादिगणशब्दः अयम्, अतः **स्वरादिनिपातमव्ययम्** (पा.सू. 1-1-37) इति अव्ययम् । अभीक्ष्णं = भृशम् इति शङ्करपदभाष्ये ।

**अभ्यद्रवत्** (मन्त्रः3.4,3.8,3.11) अभिपूर्वकाद् अद्रवत् = अभि + अद्रवत्, **इको यणचि** (पा.सू.6-1-77) इति यण्, ततः अभ्यद्रवत् इति । अद्रवत् इत्यत्र द्रु धातोः (द्रु गतौ भ्वादिः,



सि.कौ.धा.सं. 945) लङ्, द्रु + तिप्, **कर्तरि शप्** (पा.सू. 3-1-68) इति शप्, तिपः इकारस्य **इतश्च** (पा.सू. 3-4-100) इति लोपः, **सार्वधातुकार्धधातुकयोः** (पा.सू. 7-3-84) इति धातोः उकारस्य ओकारः, **एचोऽयवायावः** (पा.सू.6-1-78) इति ओकारस्य अय् - आदेशः, **लुङ्लङ्लृङ्क्ष्वड्उदात्तः** (पा.सू. 6-4-71) इति धातोः अट्-आगमः, ततः अद्रवत् इति। लङ्.प्र.पु.ब.व. ।

**अभ्यवदत्** (मन्त्रः3.4,3.8) अभिपूर्वकाद् अवदत् = अभि + अवदत्, **इको यणचि** (पा.सू.6-1-77) इति यण्, ततः अभ्यवदत् इति । अवदत् इत्यत्र वद् धातोः (वदँ व्यक्तायां वाचि, भ्वादिः, सि.कौ.धा.सं.1009) लङ्, वद् + तिप्, **कर्तरि शप्** (पा.सू. 3-1-68) इति शप्, तिपः इकारस्य **इतश्च** (पा.सू. 3-4-100) इति लोपः, **लुङ्लङ्लृङ्क्ष्वड्उदात्तः** (पा.सू. 6-4-71) इति अट्-आगमः ततः अवदत् इति। लङ्.प्र.पु.ब.व. ।

**अभ्युद्यते** (मन्त्रः1.4) अभिपूर्वकाद् उद्यते = अभि + उद्यते, **इको यणचि** (पा.सू.6-1-77) इति यण्, ततः अभ्युद्यते इति । उद्यते इत्यत्र वद् धातोः (वदँ व्यक्तायां वाचि, भ्वादिः, सि.कौ.धा.सं.1009) लट्, वद् + त, **सार्वधातुके यक्** (पा.सू. 3-1-67) इति यक्, तप्रत्ययस्य अकारस्य **टित आत्मनेपदानां टेरे** (पा.सू. 3-4-79) इति एकारः, वद् + य + ते, धातोः वकारस्य **वचिस्वपियजादीनां किति** (पा.सू. 6-1-15) इति सम्प्रसारणम्, अतः (उ + अ द्) + य + ते इति, उकाराकारयोः स्थाने **सम्प्रसारणाच्च** (पा.सू. 6-1-108) इति

**Want to read more?**

Get full access by purchasing the complete book.

Buy Now
Secured by Razorpay

**Or contact us directly:**

**Rajeshwaracharya Ji**
A19, Indira Enclave, Neb Sarai, New Delhi – 110068
Mobile: +91 81787 75405

**Swami Dayanand Ashram**
Muni Ki Raiti, Rishikesh – 249137, Uttarakhand
Mobile: +91 98430 43607